# ॥ श्री वेङ्कटेशाष्टोत्तरशतनामावलिः २ ॥

ॐ श्री वेङ्कटेशाय नमः ।
ॐ शेषाद्रिनिलयाय नमः ।
ॐ वृषद्दृग्गोचराय नमः ।
ॐ विष्णवे नमः ।
ॐ सदञ्जनगिरीशाय नमः ।
ॐ वृषाद्रिपतये नमः ।
ॐ मेरुपुत्रगिरीशाय नमः ।
ॐ सरस्वामितटीजुषे नमः ।
ॐ कुमारकल्पसेव्याय नमः ।
ॐ वज्रिदृग्विषयाय नमः ।
ॐ सुवर्चलासुतन्यस्तसेनापत्यभराय नमः ।
ॐ रमाय नमः ।
ॐ पद्मनाभाय नमः ।
ॐ सदावायुस्तुताय नमः ।
ॐ त्यक्तवैकुण्ठलोकाय नमः ।
ॐ गिरिकुञ्जविहारिणे नमः ।
ॐ हरिचन्दनगोत्रेन्द्रस्वामिने नमः ।
ॐ शङ्खराजन्यनेत्राब्जविषयाय नमः ।
ॐ वसूपरिचरत्रात्रे नमः ।
ॐ कृष्णाय नमः ।
ॐ अब्धिकन्यापरिष्वक्तवक्षसे नमः ।
ॐ वेङ्कटाय नमः ।
ॐ सनकादिमहायोगिपूजिताय नमः ।
ॐ देवजित्प्रमुखानन्तदैत्यसङ्घप्रणाशिने नमः ।
ॐ श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय नमः ।
ॐ शेषपर्वतरूपत्वप्रकाशनपराय नमः ।
ॐ सानुस्थापितताक्ष्याय नमः ।
ॐ मायामूढविमानाय नमः ।
ॐ गरुडस्कन्धवासिने नमः ।
ॐ अनन्तचरणाय नमः ।
ॐ अनन्तशिरसे नमः ।
ॐ अनताक्षाय नमः ।
ॐ श्रीशैलनिलयाय नमः ।
ॐ दामोदराय नमः ।
ॐ नीलमेघतिभाय नमः ।
ॐ ब्रह्मादिदेवदुर्दर्शविश्वरूपाय नमः ।
ॐ वैकुण्ठागतसद्धेमविमानान्तर्गताय नमः ।
ॐ अगस्त्याभ्यर्चितशेषजनदृग्गोचराय नमः ,
ॐ वासुदेवाय नमः ।
ॐ हरये नमः ।
ॐ तीर्थपञ्चकवासिने नमः ।
ॐ वामदेवप्रियाय नमः ।
ॐ जनकेष्टप्रदाय नमः ।
ॐ मार्कण्डेयमहातीर्थजातपुण्यप्रदाय नमः ।
ॐ वाक्पतिब्रह्मदात्रे नमः ।
ॐ चन्द्रलावण्यदायिने नमः ।
ॐ नारायणनगेशाय नमः ।
ॐ ब्रह्मक्लृप्तोत्सवाय नमः ।
ॐ शङ्खचक्रवरानम्रलसत्करतलाय नमः ।
ॐ केशवाय नमः ।
ॐ नित्ययौवनमूर्तये नमः ।
ॐ अर्थितार्थप्रदात्रे नमः ।
ॐ विश्वतीर्थाघहारिणे नमः ।
ॐ तीर्थस्वामिसरस्नातमनुजाबीष्टदायिने नमः ।
ॐ कुमारधारिकावासस्कन्दाभीष्टप्रदायिने नमः ।
ॐ जानुदघ्नसमुद्भूतपोत्रिणे नमः ।
ॐ कूर्ममूर्तये नमः ।
ॐ किन्नरद्वन्द्वशापान्तप्रदात्रे नमः ।
ॐ विभवे नमः ।
ॐ वैखानसमुनिश्रेष्ठपूजिताय नमः ।
ॐ सिंहाचलनिवासाय नमः ।
ॐ श्रीमन्नारायणाय नमः ।
ॐ सद्भक्तनीलकण्ठार्च्याय नमः ।
ॐ नृसिंहाय नमः ।
ॐ कुमुदाक्षगणश्रेष्ठसेनापत्यप्रदाय नमः ।
ॐ दुर्मेधप्राणहन्त्रे नमः ।
ॐ श्रीधराय नमः ।
ॐ क्षत्रियान्तकरामाय नमः ।
ॐ मत्स्यरूपाय नमः ।
ॐ पाण्डवारिप्रहर्त्रे नमः ।
ॐ श्रीकराय नमः ।
ॐ वुपत्यकाप्रदेशस्थशङ्करध्यातमूर्तये नमः ।
ॐ रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने नमः ।
ॐ लसल्लक्ष्मीकराम्भोजदत्तकह्लाकसृजे नमः ।
ॐ सालग्रामनिवासाय नमः ।
ॐ नारायणार्चिताशेषजनदृग्विषयाय नमः ।
ॐ मृगयारसिकाय नमः ।
ॐ वृषभासुरहारिणे नमः ।
ॐ अञ्जनागोत्रपतये नमः ।
ॐ माधवीयाघहारिणे नमः ।
ॐ प्रियङ्गुप्रियभक्षाय नमः ।
ॐ श्वेतकोलपराय नमः ।
ॐ नीलधेनुपयोधारासेकदेहोद्भवाय नमः ।
ॐ शङ्करप्रियमित्राय नमः ।
ॐ चोलपुत्रप्रियाय नमः ।
ॐ सुधर्मिणीसुचैतन्यप्रदात्रे नमः ।
ॐ मधुघातिने नमः ।
ॐ कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय नमः ।
ॐ वराहाचलनाथाय नमः ।
ॐ बलभद्राय नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ हृषीकेशाय नमः ।
ॐ अच्युताय नमः ।
ॐ नीलाद्रिनिलयाय नमः ।
ॐ क्षीराब्धिनाथाय नमः ।
ॐ वैकुण्ठाचलवासिने नमः ।
ॐ मुकुन्दाय नमः ।
ॐ अनन्ताय नमः ।
ॐ विरिञ्चाभ्यर्थितानीतसौम्यरूपाय नमः ।
ॐ सुवर्णमुखरीस्नातमनुजाभीष्टदायिने नमः ।
ॐ हलायुधजगत्तीर्थसमन्तफलदायिने नमः ।
ॐ गोविन्दाय नमः ।
ॐ श्रीनिवासाय नमः ।
ॐ अलमेलुमङ्गासमेत श्री वेङ्कटेशाय नमः ।
ॐ भक्ताभीष्टफलप्रदाय नमः ।
इति वराहपुराणान्तर्गत
श्रीवेङ्कटेश्वराष्टोत्तरशतनामावलिः समाप्ता ॥

Last updated January 25, 2003